# श्रीमद् भागवत रसिक कुटुंब

## चौराष्टकम्

व्रजे प्रसिद्धं(न्) नवनीतचौरं(ङ्)
गोपाङ्गनानां(ञ्) च दुकूलचौरम् ।
अनेकजन्मार्जितपापचौरं(ञ्)
चौराग्रगण्यं(म्) पुरुषं(न्) नमामि ॥ 1॥

श्रीराधिकाया हृदयस्य चौरं(न्)
नवाम्बुदश्यामलकान्तिचौरम् ।
पदाश्रितानां(ञ्) च समस्तचौरं(ञ्)
चौराग्रगण्यं(म्) पुरुषं(न्) नमामि ॥ 2॥

अकिञ्चनीकृत्य पदाश्रितं(यँ) यः(ख्)
करोति भिक्षुं(म्) पथि गेहहीनम् ।
केनाप्यहो भीषणचौर ईदृग्-
दृष्टः(श्) श्रुतो वा न जगत्त्रयेऽपि ॥ 3॥

यदीय नामापि हरत्यशेषं(ङ्)
गिरिप्रसारान् अपि पापराशीन् ।

आश्चर्यरूपो ननु चौर ईदृग्
दृष्टः(श्) श्रुतो वा न मया कदापि ॥ 4॥

धनं(ञ्) च मानं(ञ्) च तथेन्द्रियाणि
प्राणां(म्)श्च हृत्वा मम सर्वमेव ।
पलायसे कुत्र धृतोऽद्य चौर
त्वं (म्) भक्तिदाम्नासि मया निरुद्धः ॥ 5॥

छिनत्सि घोरं(यँ) यमपाशबन्धं(म्)
भिनत्सि भीमं(म्) भवपाशबन्धम् ।
छिनत्सि सर्वस्य समस्तबन्धं(न्)
नैवात्मनो भक्तकृतं(न्) तु बन्धम् ॥ 6॥

मन्मानसे तामसराशिघोरे
कारागृहे दुःखमये निबद्धः ।
लभस्व हे चौर! हरे! चिराय
स्वचौर्यदोषोचितमेव दण्डम् ॥ 7॥

कारागृहे वस सदा हृदये मदीये
मद्भक्तिपाशदृढबन्धननिश्चलः(स्) सन् ।
त्वां(ङ्) कृष्ण हे! प्रलयकोटिशतान्तरेऽपि
सर्वस्वचौर! हृदयान् न हि मोचयामि ॥ 8॥

इति श्रीबिल्वमङ्गलठाकूरविरचितं(ञ्) चौराष्टकं(म्) सम्पूर्णम् ।